श्री दीप दुर्गा कवचं

श्री दीप दुर्गा कवचं

श्री भैरव उवाच |
शृणु देवि जगन्मातर्ज्वालादुर्गां ब्रवीम्यहं |
कवचं मंत्रगर्भं च त्रैलोक्यविजयाभिदं || 1 ||

अप्रकाश्यं परं गुह्यं न कस्य कथितं मया |
विनामुना न सिद्धिः स्यात् कवचेन महेश्वरि || 2 ||

अवक्तव्यमदातव्यं दुष्टायाऽसाधकाय च |
निंदकायान्यशिष्याय न वक्तव्यं कदाचन || 3 ||

श्री देव्युवाच |
त्रैलोक्यनाथ वद मे बहुधा कथितं मया |
स्वयं त्वया प्रसादोऽयं कृतः स्नेहेन मे प्रभो || 4 ||

श्री भैरव उवाच |
प्रभाते चैव मध्याह्ने सायंकालेर्धरात्रके |
कवचं मंत्रगर्भं च पठनीयं परात्परं || 5 ||

मधुना मत्स्यमांसादिमोदकेन समर्चयेत् |
देवतां परया भक्त्या पठेत् कवचमुत्तमं || 6 ||

ॐ ह्रीं मे पातु मूर्धानं ज्वाला द्व्यक्षरमातृका |
ॐ ह्रीं श्रीं मेऽवतात् फालं त्र्यक्षरी विश्वमातृका || 7 ||

ॐ ऐं क्लीं सौः ममाव्यात् सा देवी माया भ्रुवौ मम |
ॐ अं आं इं ईं सौः पायान्नेत्रा मे विश्वसुंदरी || 8 ||

ॐ ह्रीं ह्रीं सौः पुत्र नासां उं ऊं कर्णौ च मोहिनी |
ऋं ॠं लृं लॄं सौः मे बाला पायाद्गंडौ च चक्षुषी || 9 ||

एं ऐं ॐ औं सदाऽव्यान्मे मुखं श्री भगरूपिणी |
अं अः ॐ ह्रीं क्लीं सौः पायाद्गलं मे भगधारिणी || 10 ||

कं खं गं घं (ॐ ह्रीं) सौः स्कंधौ मे त्रिपुरेश्वरी |
ङं चं छं जं (ह्रीं) सौः वक्षः पायाच्च बैंदवेश्वरी || 11 ||

झं ञं टं ठं सौः ऐं क्लीं हूं ममाव्यात् सा भुजांतरं |
डं ढं णं तं स्तनौ पायाद्भैरुंडा मम सर्वदा || 12 ||

थं दं धं नं कुक्षिं पायान्मम ह्रीं श्रीं परा जया |
पं फं बं श्रीं ह्रीं सौः पार्श्वं मृडानी पातु मे सदा || 13 ||

भं मं यं रं श्रीं सौः लं वं नाभिं मे पातु कन्यकाः |
शं षं सं हं सदा पातु गुह्यं मे गुह्यकेश्वरी || 14 ||

वृक्षः पातु सदा लिंगं ह्रीं श्रीं लिंगनिवासिनी |
ऐं क्लीं सौः पातु मे मेढ्रं पृष्ठं मे पातु वारुणी || 15 ||

ॐ श्रीं ह्रीं क्लीं हुं हूं पातु ऊरू मे पात्वमासदा |
ॐ ऐं क्लीं सौः यां वात्याली जंघे पायात्सदा मम || 16 ||

ॐ श्रीं सौः क्लीं सदा पायाज्जानुनी कुलसुंदरी |
ॐ श्रीं ह्रीं हूं कूवली च गुल्फौ ऐं श्रीं ममाऽवतु || 17 ||

ॐ श्रीं ह्रीं क्लीं ऐं सौः पायात् कुंठी क्लीं ह्रीं ह्रौः मे तलं |
ॐ ह्रीं श्रीं पादौ सौः पायद् ह्रीं श्रीं क्लीं कुत्सिता मम || 18 ||

ॐ ह्रीं श्रीं कुटिला ह्रीं क्लीं पादपृष्ठं च मेऽवतु |
ॐ श्रीं ह्रीं श्रीं च मे पातु पादस्था अंगुलीः सदा || 19 ||

ॐ ह्रीं सौः ऐं कुहूः मज्जां ॐ श्रीं कुंती ममाऽवतु |
रक्तं कुंभेश्वरी ऐं क्लीं शुक्लं पायाच्च खेचरी || 20 ||

पातु मेऽंगानि सर्वाणि ॐ ह्रीं श्रीं क्लीं ऐं सौः सदा |
पादादिमूर्धपर्यंतं ह्रीं क्लीं श्रीं कारुणी सदा || 21 ||

मूर्धादिपादपर्यंतं पातु क्लीं श्रीं कृतिर्मम |
ऊर्ध्वं मे पातु ब्रां ब्राह्मीं अधः श्रीं शांभवी मम || 22 ||

दुं दुर्गा पातु मे पूर्वे वां वाराही शिवालये |
ह्रीं क्लीं हूं श्रीं च मां पातु उत्तरे कुलकामिनी || 23 ||

नारसिंही सौः ऐं क्लीं (ह्रीं) वायव्ये पातु मां सदा |
ॐ श्रीं क्लीं ऐं च कौमारी पश्चिमे पातु मां सदा || 24 ||

ॐ ह्रीं श्रीं निर्ऋतौ पातु मातंगी मां शुभंकरी |
ॐ श्रीं ह्रीं क्लीं सदा पातु दक्षिणे भद्रकालिका || 25 ||

ॐ श्रीं ऐं क्लीं सदाऽग्नेय्यामुग्रतारा तदाऽवतु |
ॐ वं दशदिशो रक्षेन्मां ह्रीं दक्षिणकालिका || 26 ||

सर्वकालं सदा पातु ऐं सौः त्रिपुरसुंदरी |
मारीभये च दुर्भिक्षे पीडायां योगिनीभये || 27 ||

ॐ ह्रीं श्रीं त्र्यक्षरी पातु देवी ज्वालामुखी मम |
इतीदं कवचं पुण्यं त्रिषु लोकेषु दुर्लभं || 28 ||

त्रैलोक्यविजयं नाम मंत्रगर्भं महेश्वरी |
अस्य प्रसादादीशोऽहं भैरवाणां जगत्त्रये || 29 ||

सृष्टिकर्तापहर्ता च पठनादस्य पार्वती |
कुंकुमेन लिखेद्भूर्जे आसवेनस्वरेतसा || 30 ||

स्तंभयेदखिलान् देवान् मोहयेदखिलाः प्रजाः |
मारयेदखिलान् शत्रून् वशयेदपि देवताः || 31 ||

बाहौ धृत्वा चरेद्युद्धे शत्रून् जित्वा गृहं व्रजेत् |
प्रोते रणे विवादे च कारायां रोगपीडने || 32 ||

ग्रहपीडादि कालेषु पठेत् सर्वं शमं व्रजेत् |
इतीदं कवचं देवि मंत्रगर्भं सुरार्चितं || 33 ||

यस्य कस्य न दातव्यं विना शिष्याय पार्वति |
मासेनैकेन भवेत् सिद्धिर्देवानां या च दुर्लाभा |
पठेन्मासत्रयं मर्त्यो देवीदर्शनमाप्नुयात् || 34 ||

इति श्री रुद्रयामल तंत्रे श्रीभैरवदेवि संवादे श्रीदीपदुर्गा कवच स्तोत्रं |